.. karpuura aaratii mantraH ..

# ॥ कर्पूर आरती मन्त्रः ॥

श्रियः कान्ताय कल्याण निधये निधयेऽर्थिनां
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥ १
लक्ष्मीचरणलाक्षाङ्कसाक्षिश्रीवत्सवक्षसे ।
क्षेमङ्कराय सर्वेषां श्रीरङ्गेशाय मङ्गलम् ॥ २ ॥
समस्तजीवमोक्षाय श्रीरङ्गपुरवासिने ।
कन्द्वादमुनिपूज्याय श्रीनिवासाय मङ्गलम् ॥ ३ ॥
अस्तु श्रीस्तनकस्तूरीवासनावासितोरसे ।
श्रीहस्तिगिरिनाथाय देवराजाय मङ्गलम् ॥ ४ ॥
कमलाकुच कस्तूरी कर्दमाङ्कित वक्षसे ।
यादवाद्रिनिवासाय सम्पत्पुत्राय मङ्गलम् ॥ ५ ॥
मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ६ ॥
श्रीमद्गोपालबालाय गोदाभीष्टप्रदायिने ।
श्रीसत्यासहिताथास्तु कृष्णदेवाय मङ्गलम् ॥ ७ ॥
नीलाचलनिवासाय नित्याय परमात्मने ।
सुभद्राप्राणनाथाय जगन्नाथाय मङ्गलम् ॥ ८ ॥
आजन्मनः षोडशाब्दं स्तन्याद्यनभिलाषिणे ।
श्रीशानुभवपुष्टाय शठकोपाय मङ्गलम् ॥ ९ ॥
श्रीमत्यै विष्णुचित्तार्यमनोनन्दनहेतवे ।
नन्दनन्दनसुन्दर्यै गोदायै नित्य मङ्गलम् ॥ १० ॥
श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः ।
कान्तिमत्यां प्रसूताय यतिराजाय मङ्गलम् ॥ ११ ॥
मङ्गलाशासन परैर्मदाचार्य पुरोगमैः
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १२ ॥
श्रीमते रम्यजामात्रे मुनीन्द्राय महात्मने
श्रीरङ्गवासिने भूयात् नित्यश्रीर्नित्यमङ्गलम् ॥ १३ ॥

Please send corrections to sanskrit@cheerful.com
Last updated October 12, 2001